भद्रान्न्यग्रोधात्पर्णात्सा न एह्यरुन्धति ॥५॥

हिरण्यवर्णे सुभगे सूर्यवर्णे वपुष्टमे ।
रुतं गच्छासि निष्कृते निष्कृतिर्नाम वा असि ॥६॥

हिरण्यवर्णे सुभगे शुष्मे लोमशवक्षणे ।
अपामसि स्वसा लाक्षे वातो हात्मा बभूव ते ॥७॥

सिलाची नाम कानीनोऽजबभ्रु पिता तव ।
अश्वो यमस्य यः श्यावस्तस्य हास्नास्युक्षिता ॥८॥

अश्वस्यास्नः संपतिता सा वृक्षाँ अभि सिष्यदे ।
सरा पतत्रिणी भूत्वा सा न एह्यरुन्धति ॥९॥

## (६) षष्ठं सूक्तम्

(१-१४) चतुर्दशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । (१) प्रथमर्चो ब्रह्मादित्यः
(२) द्वितीयायाः कर्माणि (३-४) तृतीयाचतुर्थ्यो रुद्रगणाः
(५-८) पञ्चम्यादिचतसृणां सोमारुद्रौ (९) नवम्या हेतिः (१०) दशम्या अग्निः
(११-१४) एकादश्यादिचतसृणाञ्च सर्वात्मा रुद्रो देवताः ।
(१, ९) प्रथमानवम्योत्रिष्टुप् (२) द्वितीयाया अनुष्टुप् (३) तृतीयाया जगती
(४) चतुर्थ्याः पञ्चपदानुष्टुबुष्णिक्त्रिष्टुब्गर्भा जगती (५-७) पञ्चम्यादितृचस्य त्रिपदा
विराड्गायत्री (८) अष्टम्या एकावसाना द्विपदार्च्यनुष्टुप् (१०) दशम्याः प्रस्तारपङ्क्तिः
(११-१३) एकादश्यादितृचस्य पङ्क्तिः (१४) चतुर्दश्याश्च स्वराट् पङ्क्तिश्छन्दांसि

ब्रह्म जज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः ।
स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च वि वः ॥१॥

अनाप्ता ये वः प्रथमा यानि कर्माणि चक्रिरे ।
वीरान्नो अत्र मा दभन्तद्व एतत्पुरो दधे ॥२॥

सहस्रधार एव ते समस्वरन्दिवो नाके मधुजिह्वा असश्चतः ।
तस्य स्पशो न नि मिषन्ति भूर्णयः पदेपदे पाशिनः सन्ति सेतवे ॥३॥

यन्मेऽस्ति तेन ॥१३॥

इन्द्रस्य वरूथमसि ।
तं त्वा प्र पद्ये तं त्वा प्र विशामि सर्वगुः सर्वपूरुषः सर्वात्मा सर्वतनूः सह
यन्मेऽस्ति तेन ॥१४॥

## (७) सप्तमं सूक्तम्

(१-१०) दशर्चस्यास्य सूक्तस्याथर्वा ऋषिः । (१-३, ६-१०) प्रथमादितृचस्य
षष्ठ्यादिपञ्चर्चाञ्चारातयः (४-५) चतुर्थीपञ्चम्योश्च सरस्वती देवताः ।
(१) प्रथमाया विराड्गर्भा प्रस्तारपङ्क्तिः
(२-३, ५, ७-१०) द्वितीयातृतीयापञ्चमीनां सप्तम्यादिचतसृणाञ्चानुष्टुप्
(४) चतुर्थ्याः मध्याबृहती (६) षष्ठ्याश्च प्रस्तारपङ्क्तिश्छन्दांसि ॥

आ नो भर मा परि ष्ठा अराते मा नो रक्षीर्दक्षिणां नीयमानाम् ।
नमो वीर्त्साया असमृद्धये नमो अस्त्वरातये ॥१॥

यमराते पुरोधत्से पुरुषं परिरापिणम् ।
नमस्ते तस्मै कृण्मो मा वनिं व्यथयीर्मम ॥२॥

प्र णो वनिर्देवकृता दिवा नक्तं च कल्पताम् ।
अरातिमनुप्रेमो वयं नमो अस्त्वरातये ॥३॥

सरस्वतीमनुमतिं भगं यन्तो हवामहे ।
वाचं जुष्टां मधुमतीमवादिषं देवानां देवहूतिषु ॥४॥

यं याचाम्यहं वाचा सरस्वत्या मनोयुजा ।
श्रद्धा तमद्य विन्दतु दत्ता सोमेन बभ्रुणा ॥५॥

मा वनिं मा वाचं नो वीर्त्सीरुभाविन्द्राग्नी आ भरतां नो वसूनि ।
सर्वे नो अद्य दित्सन्तोऽरातिं प्रति हर्यत ॥६॥

कर्णा श्वावित्तदब्रवीद्गिरेरवचरन्तिका ।
याः काश्चेमाः खनित्रिमास्तासामरसतमं विषम् ॥९॥

ताबुवं न ताबुवं न घेत्त्वमसि ताबुवम् ।
ताबुवेनारसं विषम् ॥१०॥

तस्तुवं न तस्तुवं न घेत्त्वमसि तस्तुवम् ।
तस्तुवेनारसं विषम् ॥११॥

## (१४) चतुर्दशं सूक्तम्

(१-१३) त्रयोदशर्चस्यास्य सूक्तस्य शुक्र ऋषिः । (१-२) प्रथमाद्वितीययोर्ऋचोरोषधिः । (३-१३) तृतीयाद्येकादशानाञ्च कृत्यापरिहरणं देवते ।
(१-२, ४, ६-७, ९) प्रथमाद्वितीयाचतुर्थीषष्ठीसप्तमीनवमीनामनुष्टुप्
(३, ५, १२) तृतीयापञ्चमीद्वादशीनां भुरिगनुष्टुप् (८) अष्टम्यास्त्रिपदा विराडनुष्टुप्
(१०) दशम्या निचृद्बृहती (११) एकादश्यास्त्रिपदा साम्नी त्रिष्टुप्
(१३) त्रयोदश्याश्च स्वराडनुष्टुप् छन्दांसि

सुपर्णस्त्वान्वविन्दत्सूकरस्त्वाखनन्नसा ।
दिप्सौषधे त्वं दिप्सन्तमव कृत्याकृतं जहि ॥१॥

अव जहि यातुधानानव कृत्याकृतं जहि ।
अथो यो अस्मान्दिप्सति तमु त्वं जह्योषधे ॥२॥

रिश्यस्येव परीशासं परिकृत्य परि त्वचः ।
कृत्यां कृत्याकृते देवा निष्कमिव प्रति मुञ्चत ॥३॥

पुनः कृत्यां कृत्याकृते हस्तगृह्य परा णय ।
समक्षमस्मा आ धेहि यथा कृत्याकृतं हनत् ॥४॥

कृत्याः सन्तु कृत्याकृते शपथः शपथीयते ।
सुखो रथ इव वर्ततां कृत्या कृत्याकृतं पुनः ॥५॥

परा॑ञ्चं चैनं॒ प्राशीः॑ प्रा॒णास्त्वा॑ हास्य॒न्तीत्यै॑नमाह ॥२८॥

प्र॒त्यञ्चं॑ चैनं॒ प्राशी॑रपा॒नास्त्वा॑ हास्य॒न्तीत्यै॑नमाह ॥२९॥

नैवाहमो॑द॒नं न मामो॑द॒नः ॥३०॥

ओ॒द॒न ए॒वौद॒नं प्राशी॑त् ॥३१॥

(२) द्वितीयः पर्यायः

(१-१८) अष्टादशगणस्यास्य पर्यायस्य (१, ७, १०, १-१८) प्रथमसप्तमदशमगणानां प्रथमानामवसानर्चां प्रथमाद्यष्टादशानाञ्च सप्तमीना साम्नी त्रिष्टुप् (१, ४, ११, १-१८, २-३, १३-१७) प्रथमचतुर्थैकादशानां द्वितीयानां, प्रथमाद्यष्टादशानां तृतीयानां, द्वितीयतृतीययोस्त्रयोदशादिपञ्चानाञ्च पञ्चमीनामेकपदासुरी गायत्री, (१, १०, १२, १६) प्रथमदशमद्वादशषोडशानाञ्चतुर्थीनां दैवी जगती (२, १३) द्वितीयत्रयोदशयोश्चतुर्थ्योरासुरी बृहती) (७, १३, १५, १, ४-१२, १८) सप्तमत्रयोदशपञ्चदशानां द्वितीयानां, प्रथमस्य चतुर्थादिनवानामष्टादशस्य च पञ्चमीनामेकपदासुर्यनुष्टुप् (१-१८) प्रथमाद्यष्टादशानां षष्ठीनां साम्न्यनुष्टुप् (२-५, ८-९, ११-१८) द्वितीयादिचतुर्णामष्टमनवमयोरेकादशाद्यष्टानाञ्च प्रथमानामार्च्यनुष्टुप् (६) षष्ठस्य प्रथमायाः साम्नी पङ्क्तिः (२, ५, ९, १६, १७) द्वितीयपञ्चमनवमषोडशसप्तदशानां द्वितीयानामासुरी जगती (३, ६, १०, १२, १४) तृतीयषष्ठदशमद्वादशचतुर्दशानां द्वितीयानामासुरी पङ्क्तिः (३) तृतीयस्य चतुर्थ्या आसुरी त्रिष्टुप् (४, १५, १७) चतुर्थपञ्चदशसप्तदशानां चतुर्थीनां याजुषी गायत्री (५, ६, ९) पञ्चमषष्ठनवमानां चतुर्थीनां दैवी पङ्क्तिः (७-८) सप्तमाष्टमयोश्चतुर्थ्योः प्राजापत्या गायत्री (८) अष्टमस्य द्वितीयाया आसुर्युष्णिक् (११, १४, १८) एकादशचतुर्दशाष्टादशानां चतुर्थीनां दैवी त्रिष्टुप् (१८) अष्टादशस्य च द्वितीयाया एकपदा भुरिक् साम्नी बृहती छन्दांसि ॥

तत॑श्चैनम॒न्येन॑ शी॒र्ष्णा प्राशी॒र्येन॑ चै॒तं पूर्व॒ ऋष॑यः प्राश्न॑न् ।
ज्ये॒ष्ठ॒तस्ते॑ प्र॒जा म॑रिष्य॒तीत्यै॑नमाह ।
तं वा अ॒हं नार्वाञ्चं॒ न परा॑ञ्चं॒ न प्र॒त्यञ्च॑म् ।
बृ॒ह॒स्पति॑ना शी॒र्ष्णा ।
तेनै॑नं॒ प्राशि॑षं॒ तेनै॑नमजीगमम् ।
ए॒ष वा ओ॑द॒नः सर्वा॑ङ्गः॒ सर्व॑परुः॒ सर्व॑तनूः ।

आस्नैयीश्च वास्तैयीश्च त्वरणाः कृपणाश्च याः ।
गुह्याः शुक्रा स्थूला अपस्ता बीभत्सावसादयन् ॥२८॥

अस्थि कृत्वा समिधं तदष्टापो असादयन् ।
रेतः कृत्वाज्यं देवाः पुरुषमाविशन् ॥२९॥

या आपो याश्च देवता या विराड् ब्रह्मणा सह ।
शरीरं ब्रह्म प्राविशच्छरीरेऽधि प्रजापतिः ॥३०॥

सूर्यश्चक्षुर्वातः प्राणं पुरुषस्य वि भैजिरे ।
अथास्येतरमात्मानं देवाः प्रायच्छन्नग्नये ॥३१॥

तस्माद्वै विद्वान्पुरुषमिदं ब्रह्मेति मन्यते ।
सर्वा ह्यस्मिन्देवता गावो गोष्ठ इवासते ॥३२॥

प्रथमेन प्रमारेण त्रेधा विष्वङ्व गच्छति ।
अद एकेन गच्छत्यद एकेन गच्छतीहैकेन नि षेवते ॥३३॥

अप्सु स्तीमासु वृद्धासु शरीरमन्तरा हितम् ।
तस्मिञ्छवोध्यन्तरा तस्माच्छवोध्युच्यते ॥३४॥

## (९) नवमं सूक्तम्

(१-२६) षड्विंशत्यृचस्यास्य सूक्तस्य काङ्कायन ऋषिः । अर्बुदिर्देवता ।
(१) प्रथमर्चस्त्र्यवसाना सप्तपदा विराट् शक्वरी (२, ५-८, १०, १२-१३, १८-२१)
द्वितीयायाः पञ्चम्यादिचतसृणां दशमीद्वादशीत्रयोदशीनामष्टादश्यादिचतसृणाञ्चानुष्टुप्
(३) तृतीयायाः परोष्णिक्
(४) चतुर्थ्यास्त्र्यवसानोष्णिग्बृहतीगर्भा परात्रिष्टुप् षट्पदातिजगती
(९, ११, १४, २३, २६) नवम्येकादशीचतुर्दशीत्रयोविंशीषड्विंशीनां पथ्यापङ्क्तिः
(१५, २२, २४-२५) पञ्चदशीद्वाविंशीचतुर्विंशीपञ्चविंशीनां त्र्यवसाना सप्तपदा शक्वरी
(१६) षोडश्यास्त्र्यवसाना पञ्चपदा विराडुपरिष्टाज्ज्योतिस्त्रिष्टुप्
(१७) सप्तदश्याश्च त्रिपदा गायत्री छन्दांसि

# अथ द्वादशं काण्डम्

## (१) प्रथमं सूक्तम्

(१-६३) त्रिषष्ट्यृचस्यास्य सूक्तस्याथर्वा ऋषिः । भूमिर्देवता । (१, ३, १७, २९, ३१, ५५, ६०) प्रथमातृतीयासप्तदश्येकोनत्रिंश्येकत्रिंशीपञ्चपञ्चाशीषष्टीनामृचां त्रिष्टुप् (२) द्वितीयाया भुरिक्त्रिष्टुप् (४-६, १०, ३८) चतुर्थ्यादितृचस्य दशम्यष्टात्रिंश्योश्च त्र्यवसाना षट्पदा जगती (७) सप्तम्याः प्रस्तारपङ्क्तिः (८, ११) अष्टम्येकादश्योस्त्र्यवसाना षट्पदा विराडष्टिः (९) नवम्याः परानुष्टुप्त्रिष्टुप् (१२-१३, ३७) द्वादशीत्रयोदशीसप्तत्रिंशीनां त्र्यवसाना पञ्चपदा शक्वरी (१४) चतुर्दश्या महाबृहती (१५) पञ्चदश्याः पञ्चपदा शक्वरी (१६, २१) षोडश्येकविंश्योरेकावसाना साम्नी त्रिष्टुप् (१८) अष्टादश्यास्त्र्यवसाना षट्पदा त्रिष्टुबनुष्टुब्गर्भातिशक्वरी (१९) एकोनविंश्या उरोबृहती (२०) विंश्या विराडुरोबृहती (२२) द्वाविंश्यास्त्र्यवसाना षट्पदा विराडतिजगती (२३) त्रयोविंश्याः पञ्चपदा विराडतिजगती (२४) चतुर्विंश्याः पञ्चपदानुष्टुब्गर्भा जगती (२५) पञ्चविंश्यास्त्र्यवसाना सप्तपदोष्णिगनुष्टुब्गर्भा शक्वरी (२६-२८, ३३, ३५, ३९-४०, ५०, ५४, ५६, ५९, ६३) षड्विंश्यादितृचस्य त्रयस्त्रिंशीपञ्चत्रिंश्येकोनचत्वारिंशीचत्वारिंशीपञ्चाशीचतुष्पञ्चाशीषट्पञ्चाश्येकोनषष्टीत्रिषष्टीनाञ्चानुष्टुप् (३०) त्रिंश्या विराड्गायत्री (३२) द्वात्रिंश्याः पुरस्ताज्ज्योतिस्त्रिष्टुप् (३४) चतुस्त्रिंश्यास्त्र्यवसाना षट्पदा त्रिष्टुब्बृहतीगर्भातिजगती (३६) षट्त्रिंश्या विपरीतपादलक्ष्मा पङ्क्तिः (४१) एकचत्वारिंश्यास्त्र्यवसाना षट्पदा ककुम्मती शक्वरी (४२) द्विचत्वारिंश्याः स्वराडनुष्टुप् (४३) त्रिचत्वारिंश्या विराडास्तारपङ्क्तिः (४४-४५, ४९) चतुश्चत्वारिंशीपञ्चचत्वारिंश्येकोनपञ्चाशीनां जगती (४६) षट्चत्वारिंश्याः षट्पदानुष्टुब्गर्भा पराशक्वरी (४७) सप्तचत्वारिंश्याः षट्पदोष्णिगनुष्टुब्गर्भा परातिशक्वरी (४८) अष्टचत्वारिंश्याः पुरोऽनुष्टुप्त्रिष्टुप् (५१) एक्पञ्चाश्यास्त्र्यवसाना षट्पदानुष्टुब्गर्भा ककुम्मती शक्वरी (५२) द्विपञ्चाश्याः पञ्चपदानुष्टुब्गर्भा परातिजगती (५३) त्रिपञ्चाश्याः पुरोबार्हतानुष्टुप् (५७) सप्तपञ्चाश्याः पुरोऽतिजागता जगती (५८) अष्टपञ्चाश्याः पुरस्ताद्बृहती (६१) एकषष्ट्याः पुरोबार्हता त्रिष्टुप् (६२) द्विषष्ट्याश्च पराविराट्त्रिष्टुप् छन्दांसि

स॒त्यं बृ॒हदृ॒तमु॒ग्रं दी॒क्षा तपो॒ ब्रह्म॑ य॒ज्ञः पृ॑थि॒वीं धा॑रयन्ति ।
सा नो॑ भू॒तस्य॒ भव्य॑स्य॒ पत्न्यु॒रुं लो॒कं पृ॑थि॒वी नः॑ कृणोतु ॥१॥

अ॒सं॒बा॒धं म॑ध्य॒तो मा॑न॒वा॒नां यस्या॑ उ॒द्वतः॑ प्र॒वतः॑ स॒मं ब॒हु ।
नाना॑वीर्या॒ ओष॑धी॒र्या बिभ॑र्ति पृथि॒वी नः॑ प्रथतां॒ राध्य॑तां नः ॥२॥

भूमे मातर्नि धेहि मा भद्रया सुप्रतिष्ठितम् ।
संविदाना दिवा कवे श्रियां मा धेहि भूत्याम् ॥६३॥

## (२) द्वितीयं सूक्तम्

(१-५५) पञ्चपञ्चाशदृचस्यास्य सूक्तस्य भृगुर्ऋषिः । (१-२०, ३४-५५)
प्रथमादिविंशत्यृचां चतुस्त्रिंश्यादिद्वाविंशतेश्चाग्निर्मन्त्रोक्ता वा (२१-३३)
एकविंश्यादित्रयोदशानाञ्च मृत्युर्देवता । (१, ४, १०-११, २१-३३, ५३)
प्रथमाचतुर्थीदशम्येकादशीनामेकविंश्यादित्रयोदशानां त्रिपञ्चाश्याश्च त्रिष्टुप्
(२, ५, १२-१५, १७, १९-२०, ३४-३६, ३८-३९, ४१, ४३, ५१, ५४)
द्वितीयापञ्चम्योर्द्वादश्यादिचतसृणां सप्तदश्येकोनविंशीविंशीनां
चतुस्त्रिंश्यादितृचस्याष्टात्रिंश्येकोनचत्वारिंश्येकचत्वारिंशीनां
त्रिचत्वारिंश्येकपञ्चाशीचतुष्पञ्चाशीनाञ्चानुष्टुप् (३) तृतीयाया आस्तारपङ्क्तिः
(६) षष्ठ्या भुरिगार्षी पङ्क्तिः (७, ४५) सप्तमीपञ्चचत्वारिंश्योर्जगती (८, ४८-४९)
अष्टम्यष्टचत्वारिंश्येकोनपञ्चाशीनां भुरिक्त्रिष्टुप् (९) नवम्या अनुष्टुब्गर्भा
विपरीतपादलक्ष्मा पङ्क्तिः (१६) षोडश्याःककुम्मती पराबृहत्यनुष्टुप् (१८) अष्टादश्या
निचृदनुष्टुप् (३७) सप्तत्रिंश्याः पुरस्ताद्बृहती (४०) चत्वारिंश्याः
पुरस्तात्ककुम्मत्यनुष्टुप् (४२) द्विचत्वारिंश्यास्त्रिपदैकावसाना भुरिगार्ची गायत्री
(४४) चतुश्चत्वारिंश्या एकावसाना द्विपदार्ची बृहती (४६) षट्चत्वारिंश्या
एकावसाना द्विपदा साम्नी त्रिष्टुप् (४७) सप्तचत्वारिंश्या पञ्चपदा बार्हतवैराजगर्भा
जगती (५०) पञ्चाश्या उपरिष्टाद्विराड्बृहती (५२) द्विपञ्चाश्याः पुरस्ताद्विराड्बृहती
(५५) पञ्चपञ्चाश्याश्च बृहतीगर्भा त्रिष्टुप् छन्दांसि

नडमा रोह न ते अत्र लोक इदं सीसं भागधेयं त एहि ।
यो गोषु यक्ष्मः पुरुषेषु यक्ष्मस्तेन त्वं साकमधराङ्परेहि ॥१॥

अघशंसदुःशंसाभ्यां करेणानुकरेण च ।
यक्ष्मं च सर्वं तेनेतो मृत्युं च निरजामसि ॥२॥

निरितो मृत्युं निर्ऋतिं निररातिमजामसि ।
यो नो द्वेष्टि तमद्ध्यग्ने अक्रव्याद्यमु द्विष्मस्तमु ते प्र सुवामसि ॥३॥

यद्यग्निः क्रव्याद्यदि वा व्याघ्र इमं गोष्ठं प्रविवेशान्योकाः ।

दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५८॥

ध्रुवायै त्वा दिशे विष्णवेऽधिपतये कल्माषग्रीवाय रक्षित्र ओषधीभ्य इषुमतीभ्यः ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम ॥५९॥

ऊर्ध्वायै त्वा दिशे बृहस्पतयेऽधिपतये श्वित्राय रक्षित्रे वर्षायेषुमते ।
एतं परि दद्मस्तं नो गोपायतास्माकमैतोः ।
दिष्टं नो अत्र जरसे नि नेषज्जरा मृत्यवे परि णो ददात्वथ पक्वेन सह सं भवेम

## (४) चतुर्थं सूक्तम्

(१-५३) त्रिपञ्चाशदृचस्यास्य सूक्तस्य कश्यप ऋषिः । वशा देवता ।
(१-६, ८-१९, २१-३१, ३३-४१, ४३-५३)
प्रथमादिषदृचामष्टम्यादिद्वादशानामेकविंश्याद्येकादशानां त्रयस्त्रिंश्यादिनवानां
त्रिचत्वारिंश्याद्येकादशानाञ्चानुष्टुप् (७) सप्तम्या भुरिगनुष्टुप्
(२०) विंश्या विराडनुष्टुप् (३२) द्वात्रिंश्या उष्णिग्बृहतीगर्भानुष्टुप्
(४२) द्विचत्वारिंश्याश्च बृहतीगर्भानुष्टुप् छन्दांसि

ददामीत्येव ब्रूयादनु चैनामभुत्सत ।
वशां ब्रह्मभ्यो याचद्भ्यस्तत्प्रजावदपत्यवत् ॥१॥

प्रजया स वि क्रीणीते पशुभिश्चोप दस्यति ।
य आर्षेयेभ्यो याचद्भ्यो देवानां गां न दित्सति ॥२॥

कूटयास्य सं शीर्यन्ते श्लोणया कातमर्दति ।
बण्डया दह्यन्ते गृहाः काणया दीयते स्वम् ॥३॥

## (२) द्वितीयः पर्यायः

(१-५) पञ्चर्चस्यास्य पर्यायस्य (१) प्रथमर्चः साम्नी त्रिष्टुप्
(२) द्वितीयाया भुरिगार्च्यनुष्टुप् (३) तृतीयाया आर्च्यनुष्टुप्
(४) चतुर्थ्या उष्णिक् (एताश्चतस्र एकपदाः) (५) पञ्चम्याश्चार्ची निचृत्पङ्क्तिश्छन्दांसि

ओज॑श्च॒ तेज॑श्च॒ सह॑श्च॒ बलं॑ च॒ वाक्चे॑न्द्रि॒यं च॒ श्रीश्च॒ धर्म॑श्च ॥१॥

ब्रह्म॑ च क्ष॒त्रं च॑ रा॒ष्ट्रं च॒ विश॑श्च॒ त्विषि॑श्च॒ यश॑श्च॒ वर्च॑श्च॒ द्रवि॑णं च ॥२॥

आयु॑श्च रू॒पं च॒ नाम॑ च की॒र्तिश्च॑ प्रा॒णश्चा॑पा॒नश्च॒ चक्षु॑श्च॒ श्रोत्रं॑ च ॥३॥

पय॑श्च॒ रस॒श्चान्नं॑ चा॒न्नाद्यं॑ च॒र्तं च॑ स॒त्यं चे॒ष्टं च॑ पू॒र्तं च॑ प्र॒जा च॑ प॒शव॑श्च ॥४॥

तानि॒ सर्वा॒ण्यप॑ क्रामन्ति ब्रह्मग॒वीमा॒दद॑नस्य जिन॒तो ब्रा॑ह्म॒णं क्ष॒त्रिय॑स्य ॥५॥

## (३) तृतीयः पर्यायः

(१-१६) षोडशर्चस्यास्य पर्यायस्य (१) प्रथमर्चो विराड्विषमा गायत्री
(२) द्वितीयाया आसुर्यनुष्टुप् (३, १५) तृतीयापञ्चदश्योः साम्न्युष्णिक्
(४) चतुर्थ्या गायत्री (५-६, ८-९) पञ्चमीषष्ठ्यष्टमीनवमीनां प्राजापत्यानुष्टुप्
(७) सप्तम्या याजुषी जगती (१०, १४) दशमीचतुर्दश्योः साम्न्यनुष्टुप्
(११) एकादश्याः साम्नी बृहती (१२) द्वादश्या याजुषी त्रिष्टुप्
(१३) त्रयोदश्या आसुरी गायत्री (१६) षोडश्याश्चार्च्युष्णिक् छन्दांसि

सैषा भी॒मा ब्र॑ह्मग॒व्य१॒॑घवि॑षा सा॒क्षात्कृ॒त्या कूल्ब॑ज॒मावृ॑ता ॥१॥

सर्वा॑ण्यस्यां घो॒राणि॒ सर्वे॑ च मृ॒त्यव॑ः ॥२॥

सर्वा॑ण्यस्यां क्रू॒राणि॒ सर्वे॑ पुरुषव॒धाः ॥३॥

सा ब्र॑ह्म॒ज्यं दे॑वपी॒युं ब्र॑ह्मग॒व्या॒॑दी॒यमा॑ना मृ॒त्योः पड्वी॑ष॒ आ द्य॑ति ॥४॥

(९) नवम्याः साम्न्युष्णिक् (११) एकादश्याश्च प्रतिष्ठा गायत्री छन्दांसि

वैरं विकृत्यमाना पौत्राद्यं विभाज्यमाना ॥१॥

देवहेतिर्ह्रियमाणा व्यृद्धिर्हृता ॥२॥

पाप्माधिधीयमाना पारुष्यमवधीयमाना ॥३॥

विषं प्रयस्यन्ती तक्मा प्रयस्ता ॥४॥

अघं पच्यमाना दुष्वप्न्यं पक्वा ॥५॥

मूलबर्हणी पर्याक्रियमाणा क्षितिः पर्याकृता ॥६॥

असंज्ञा गन्धेन शुगुद्ध्रियमाणाशीविष उद्धृता ॥७॥

अभूतिरुपह्रियमाणा पराभूतिरुपहृता ॥८॥

शर्वः क्रुद्धः पिश्यमाना शिमिदा पिशिता ॥९॥

अवर्तिरश्यमाना निर्ऋतिरशिता ॥१०॥

अशिता लोकाच्छिनत्ति ब्रह्मगवी ब्रह्मज्यमस्माच्चामुष्माच्च ॥११॥

## (५) पञ्चमः पर्यायः

(१-८) अष्टर्चस्यास्य पर्यायस्य (१) प्रथमर्चः साम्नी पङ्क्तिः (२) द्वितीयाया याजुष्यनुष्टुप् (३, ८) तृतीयाष्टम्योर्भुरिक्साम्न्यनुष्टुप् (४) चतुर्थ्या आसुरी बृहती (५) पञ्चम्याः साम्नी बृहती (६) षष्ठ्याः पिपीलिकमध्यानुष्टुप् (७) सप्तम्याश्चार्ची बृहती छन्दांसि

तस्या आहननं कृत्या मेनिराशसनं वलग ऊबध्यम् ॥१॥

# अथ त्रयोदशं काण्डम्

## (१) प्रथमं सूक्तम्

(१-६०) षष्ट्यृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । (१-२, ४-२७, ३२-६०)
प्रथमाद्वितीययोर्ऋचोश्चतुर्थ्यादिचतुर्विंशतेर्द्वात्रिंश्याद्येकोनत्रिंशतश्चाध्यात्मरोहिदादित्याः
(३) तृतीयायाः मरुतः (२८-३०) अष्टाविंश्यादितृचस्याग्निः
(३१) एकत्रिंश्याश्चाग्निर्मन्त्रोक्ताश्च देवताः ।
(१-२, ६-७, १०-११, २०, २२-२५, २७, ३३-३४, ३८, ४१, ५६, ५८)
प्रथमाद्वितीयाषष्ठीसप्तमीदशम्येकादशीविंशीनां द्वाविंश्यादिचतसृणां
सप्तविंशीत्रयस्त्रिंशीचतुस्त्रिंश्यष्टात्रिंश्येकचत्वारिंशीषट्पञ्चाश्यष्टपञ्चाशीनाञ्च त्रिष्टुप्
(३-५, ९, १२) तृतीयादितृचस्य नवमीद्वादश्योश्च जगती (८) अष्टम्या भुरिक्त्रिष्टुप्
(१३) त्रयोदश्या अतिशाक्वरगर्भातिजगती (१४) चतुर्दश्यास्त्रिपदा पुरःपरशाक्वरा
विपरीतपादलक्ष्मा पङ्क्तिः (१५) पञ्चदश्या अतिजागतगर्भा जगती
(१६, २९-३०, ३२, ३९-४०, ४५-५१, ५३-५४)
षोडश्येकोनत्रिंशीत्रिंशीद्वात्रिंश्येकोनचत्वारिंशीचत्वारिंशीनां पञ्चचत्वारिंश्यादिसप्तानां
त्रिपञ्चाशीचतुष्पञ्चाश्योश्चानुष्टुप् (१७) सप्तदश्याः पञ्चपदा ककुम्मती जगती (१८)
अष्टादश्याः पञ्चपदा परशाक्वरा भुरिक्ककुम्मत्यतिजगती (१९) एकोनविंश्याः
पञ्चपदातिजागता ककुम्मत्यतिजगती (२१) एकविंश्या आर्षी निचृद्गायत्री (२६)
षड्विंश्या विराट्परोष्णिक् (२८) अष्टाविंश्या भुरिगनुष्टुप् (३१) एकत्रिंश्याः पञ्चपदा
ककुम्मती शाक्वरगर्भा जगती (३५) पञ्चत्रिंश्या उपरिष्टाद्बृहती (३६) षट्त्रिंश्या
निचृन्महाबृहती (३७) सप्तत्रिंश्याः परशाक्वरा विराडतिजगती (४२) द्विचत्वारिंश्या
विराड्जगती (४३) त्रिचत्वारिंश्या विराण्महाबृहती (४४) चतुश्चत्वारिंश्याः
परोष्णिक् (५२) द्विपञ्चाश्याः पथ्यापङ्क्तिः (५५) पञ्चपञ्चाश्याः ककुम्मती बृहतीगर्भा
पथ्यापङ्क्तिः (५७) सप्तपञ्चाश्याः ककुम्मत्यनुष्टुप्
(५९-६०) एकोनषष्टीषष्ट्योश्च गायत्री छन्दांसि

उदेहि वाजिन्यो अप्स्वन्तरिदं राष्ट्रं प्र विश सूनृतावत् ।
यो रोहितो विश्वमिदं जजान स त्वा राष्ट्राय सुभृतं बिभर्तु ॥१॥

उद्वाज आ गन्यो अप्स्वन्तर्विश आ रोह त्वद्योनयो याः ।
सोमं दधानोऽप ओषधीर्गाश्चतुष्पदो द्विपद आ वेशयेह ॥२॥

यूयमुग्रा मरुतः पृश्निमातर इन्द्रेण युजा प्र मृणीत शत्रून् ।
आ वो रोहितः शृणवत्सुदानवस्त्रिषप्तासो मरुतः स्वादुसंमुदः ॥३॥

मा प्र गा॑म प॒थो व॒यं मा य॒ज्ञादि॑न्द्र सो॒मिनः॑ ।
मान्त स्थु॑र्नो॒ अरा॑तयः ॥५९॥

यो य॒ज्ञस्य॑ प्र॒साध॑न॒स्तन्तु॑र्दे॒वेष्वात॑तः ।
तमाहु॑तमशीमहि ॥६०॥

## (२) द्वितीयं सूक्तम्

(१-४६) षट्चत्वारिंशदृचस्यास्य सूक्तस्य ब्रह्मा ऋषिः । अध्यात्मरोहितादित्या देवताः । (१, १२-१५, ३९-४१) प्रथमर्चो द्वादश्यादिचतसृणामेकोनचत्वारिंश्यादितृचस्य चानुष्टुप् (२-३, ८, ४३) द्वितीयातृतीयाष्टमीत्रिचत्वारिंशीनां जगती (४-७, ९, २८, ३१-३३, ३५-३६, ३८, ४२, ४६) चतुर्थ्यादिचतसृणां नवम्यष्टाविंश्योरेकत्रिंश्यादितृचस्य पञ्चत्रिंशीषट्त्रिंश्यष्टात्रिंशीद्विचत्वारिंशीषट्चत्वारिंशीनाञ्च त्रिष्टुप् (१०) दशम्या आस्तारपङ्क्तिः (११) एकादश्या बृहतीगर्भा त्रिष्टुप् (१६-२४) षोडश्यादिनवानामार्षी गायत्री (२५) पञ्चविंश्याः ककुम्मत्यास्तारपङ्क्तिः (२६) षड्विंश्याः पुरोद्व्यतिजागता भुरिग्जगती (२७) सप्तविंश्या विराड्जगती (२९) एकोनत्रिंश्या बार्हतगर्भानुष्टुप् (३०) त्रिंश्याः पञ्चपदोष्णिग्बृहतीगर्भातिजगती (३४) चतुस्त्रिंश्या आर्षी पङ्क्तिः (३७) सप्तत्रिंश्याः पञ्चपदा विराड्गर्भा जगती (४४) चतुश्चत्वारिंश्याश्चतुष्पदा पुरःशाक्वरा भुरिग्जगती (४५) पञ्चचत्वारिंश्याश्चातिजागतगर्भा जगती छन्दांसि ॥

उद॑स्य के॒तवो॑ दि॒वि शु॒क्रा भ्राज॑न्त ईरते ।
आ॒दि॒त्यस्य॑ नृ॒चक्ष॑सो॒ महि॑व्रतस्य मी॒ढुषः॑ ॥१॥

दि॒शां प्र॒ज्ञानां॑ स्व॒रय॑न्तम॒र्चिषा॑ सुप॒क्षमा॒शुं प॒तय॑न्तमर्ण॒वे ।
स्तवा॑म॒ सूर्यं॒ भुव॑नस्य गो॒पां यो र॒श्मिभि॒र्दिश॑ आ॒भाति॒ सर्वाः॑ ॥२॥

यत्प्राङ् प्र॒त्यङ् स्व॒धया॒ यासि॒ शीभं॒ नाना॑रूपे॒ अह॑नी॒ कर्षि॒ मा॒यया॑ ।
तदा॑दित्य॒ महि॒ तत्ते॒ महि॒ श्रवो॒ यदेको॒ विश्वं॒ परि॒ भूम॒ जाय॑से ॥३॥

वि॒प॒श्चितं॑ त॒रणिं॒ भ्राज॑मानं॒ वह॑न्ति॒ यं ह॒रितः॑ स॒प्त ब॒ह्वीः ।
स्रु॒ताद्यम॒त्रिर्दिव॑मु॒न्निना॒य तं त्वा॑ पश्यन्ति परि॒यान्त॑मा॒जिम् ॥४॥

नाष्टमो न नवमो दशमो नाप्युच्यते ।
य एतं देवमेकवृतं वेद ॥५॥

स सर्वस्मै वि पश्यति यच्च प्राणति यच्च न ।
य एतं देवमेकवृतं वेद ॥६॥

तमिदं निगतं सहः स एष एक एकवृदेक एव ।
य एतं देवमेकवृतं वेद ॥७॥

सर्वे अस्मिन्देवा एकवृतो भवन्ति ।
य एतं देवमेकवृतं वेद ॥८॥

(३) तृतीयः पर्यायः

(१-७) सप्तर्चस्यास्य पर्यायस्य (१) प्रथमर्चो भुरिक्प्राजापत्या त्रिष्टुप् (२) द्वितीयाया आर्ची गायत्री (३) तृतीयायास्त्रिष्टुप् (४) चतुर्थ्या एकपदासुरी गायत्री (५) पञ्चम्या आर्च्यनुष्टुप् (६-७) षष्ठीसप्तम्योश्च प्राजापत्यानुष्टुप् छन्दांसि

ब्रह्म च तपश्च कीर्तिश्च यशश्चाम्भश्च नभश्च ब्राह्मणवर्चसं चान्नं चान्नाद्यं च
।
य एतं देवमेकवृतं वेद ॥१॥

भूतं च भव्यं च श्रद्धा च रुचिश्च स्वर्गश्च स्वधा च ॥२॥

य एतं देवमेकवृतं वेद ॥३॥

स एव मृत्युः सो३ऽमृतं सो३ऽभ्वं१ स रक्षः ॥४॥

स रुद्रो वसुवनिर्वसुदेये नमोवाके वषट्कारोऽनु संहितः ॥५॥

तस्येमे सर्वे यातव उप प्रशिषमासते ॥६॥

तस्यामू सर्वा नक्षत्रा वशे चन्द्रमसा सह ॥७॥

## (४) चतुर्थः पर्यायः

(१-१७) सप्तदशर्चस्यास्य पर्यायस्य (१, ५, ११-१२, १७)
प्रथमापञ्चम्येकादशीद्वादशीसप्तदशीनामृचामासुरी गायत्री (२, ४, ७-८, १४)
द्वितीयाचतुर्थीसप्तम्यष्टमीचतुर्दशीनां प्राजापत्यानुष्टुप् (३) तृतीयाया विराड्गायत्री
(६, ९-१०) षष्ठीनवमीदशमीनां साम्न्युष्णिक् (१३) त्रयोदश्याः साम्नी बृहती (१५)
पञ्चदश्या आर्षी गायत्री (१६) षोडश्याश्च साम्न्यनुष्टुप् छन्दांसि

स वा अह्नोऽजायत तस्मादहरजायत ॥१॥

स वै रात्र्या अजायत तस्माद्रात्रिरजायत ॥२॥

स वा अन्तरिक्षादजायत तस्मादन्तरिक्षमजायत ॥३॥

स वै वायोरजायत तस्माद्वायुरजायत ॥४॥

स वै दिवोऽजायत तस्माद्द्यौरध्यजायत ॥५॥

स वै दिग्भ्योऽजायत तस्माद्दिशोऽजायन्त ॥६॥

स वै भूमेरजायत तस्माद्भूमिरजायत ॥७॥

स वा अग्नेरजायत तस्मादग्निरजायत ॥८॥

स वा अद्भ्योऽजायत तस्मादापोऽजायन्त ॥९॥

स वा ऋग्भ्योऽजायत तस्मादृचोऽजायन्त ॥१०॥

स वै यज्ञादजायत तस्माद्यज्ञोऽजायत ॥११॥

स यज्ञस्तस्य यज्ञः स यज्ञस्य शिरस्कृतम् ॥१२॥

स स्तनयति स वि द्योतते स उ अश्मानमस्यति ॥१३॥

पापाय वा भद्राय वा पुरुषायासुराय वा ॥१४॥

यद्वा कृणोष्योषधीर्यद्वा वर्षसि भद्रया यद्वा जन्यमवीवृधः ॥१५॥

तावांस्ते मघवन्महिमोपो ते तन्वः शतम् ॥१६॥

उपो ते बध्वे बद्धानि यदि वासि न्यर्बुदम् ॥१७॥

(५) पञ्चमः पर्यायः

(१-६) षडृचस्यास्य पर्यायस्य (१) प्रथमर्च आसुरी गायत्री (२) द्वितीयाया यवमध्या गायत्री (३) तृतीयायाः साम्न्युष्णिक् (४) चतुर्थ्या निचृत्साम्नी बृहती (५) पञ्चम्याः प्राजापत्यानुष्टुप् (६) षष्ठ्याश्च विराड्गायत्री छन्दांसि

भूयानिन्द्रो नमुराद्भूयानिन्द्रासि मृत्युभ्यः ॥१॥

भूयानरात्याः शच्याः पतिस्त्वमिन्द्रासि विभूः प्रभूरिति त्वोपास्महे वयम् ॥२॥

नमस्ते अस्तु पश्यत पश्य मा पश्यत ॥३॥

अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥४॥

अम्भो अमो महः सह इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५॥

अम्भो अरुणं रजतं रजः सह इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥६॥

(६) षष्ठः पर्यायः

(१-५) पञ्चर्चस्यास्य पर्यायस्य (१-२) प्रथमाद्वितीययोर्ऋचोः प्राजापत्यानुष्टुप्
(३) तृतीयाया द्विपदार्षी गायत्री ((४) चतुर्थ्याः साम्न्युष्णिक्
(५) पञ्चम्याश्च निचृत्साम्नी बृहती) छन्दांसि

उरुः पृथुः सुभूर्भुव इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥१॥

प्रथो वरो व्यचो लोक इति त्वोपास्महे वयम् ।
नमस्ते अस्तु पश्यत पश्य मा पश्यत ।
अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥२॥

भवद्वसुरिदद्वसुः संयद्वसुरायद्वसुरिति त्वोपास्महे वयम् ॥३॥

नमस्ते अस्तु पश्यत पश्य मा पश्यत ॥४॥

अन्नाद्येन यशसा तेजसा ब्राह्मणवर्चसेन ॥५॥

इति त्रयोदशं काण्डम्

अभ्रातृघ्नीं वरुणापशुघ्नीं बृहस्पते ।
इन्द्रापतिघ्नीं पुत्रिणीमास्मभ्यं सवितर्वह ॥६२॥

मा हिंसिष्टं कुमार्यं स्थूणे देवकृते पथि ।
शालाया देव्या द्वारं स्योनं कृण्मो वधूपथम् ॥६३॥

ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः ।
अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके वि राज ॥६४॥

## (२) द्वितीयं सूक्तम्

(१-७५) पञ्चसप्तत्यृचस्यास्य सूक्तस्य सावित्री सूर्या ऋषिका ।
(१-६, १२-३५, ३७-७५) प्रथमादिनवर्चां द्वादश्यादिचतुर्विंशतेः
सप्तत्रिंश्याद्येकोनचत्वारिंशतश्चात्मा (१०) दशम्या यक्ष्मनाशनम् (११) एकादश्या
दम्पत्योः परिपन्थिनाशनम् (३६) षट्त्रिंश्याश्च देवा देवताः । (१-४, ७-८, १०-११,
१६, २१-२३, २७-३०, ४५-४६, ५३-५८, ६३-६७, ७२-७३) प्रथमादिचतसृणां
सप्तम्यष्टमीदशम्येकादशीषोडशीनामेकविंश्यादितृचस्य सप्तविंश्यादिचतसृणां
पञ्चचत्वारिंशीषट्चत्वारिंश्योस्त्रिपञ्चाश्यादितृचद्वयस्य त्रिषष्ट्यादिपञ्चानां
द्विसप्ततितमात्रिसप्ततितमयोश्चानुष्टुप्
(५-६, १२, ३१, ४०) पञ्चमीषष्ठीद्वादश्येकत्रिंशीचत्वारिंशीनां जगती
(९) नवम्यास्त्र्यवसाना षट्पदा विराडत्यष्टिः
(१३-१४, १७-१९, ४१-४२, ४९, ६१, ७०, ७४-७५) त्रयोदशीचतुर्दश्योः
सप्तदश्यादितृचस्यैकचत्वारिंशीद्विचत्वारिंश्येकोनपञ्चाश्येकषष्टीसप्तति-
तमाचतुःसप्ततितमापञ्चसप्ततितमानां ((२४-२५, ३२, ३४, ३६, ३८)
चतुर्विंशीपञ्चविंशीद्वात्रिंशीचतुस्त्रिंशीषट्त्रिंश्यष्टात्रिंशीनाञ्च) त्रिष्टुप् (१५, ५१)
पञ्चदश्येकपञ्चाश्योर्भुरिगनुष्टुप् (२०) विंश्याः पुरस्ताद्बृहती ((२६) षड्विंश्या
विराडनुष्टुप्) (३३) त्रयस्त्रिंश्या विराडास्तारपङ्क्तिः (३५) पञ्चत्रिंश्याः पुरोबृहती त्रिष्टुप्
(३७, ३९) सप्तत्रिंश्येकोनचत्वारिंश्योर्भुरिक्त्रिष्टुप् (४३) त्रिचत्वारिंश्यास्त्रिष्टुब्गर्भा पङ्क्तिः
(४४) चतुश्चत्वारिंश्याः प्रस्तारपङ्क्तिः ((४७) सप्तचत्वारिंश्याः पथ्याबृहती) (४८)
अष्टचत्वारिंश्याः सतःपङ्क्तिः ((५०) पञ्चाश्या उपरिष्टाद्बृहती) (५२) द्विपञ्चाश्या
विराट्परोष्णिक् (५९-६०, ६२) एकोनषष्टीषष्टीद्विषष्टीनां पथ्यापङ्क्तिः
((६८) अष्टषष्ट्याः विराट् पुर उष्णिक्) (६९) एकोनसप्ततितमायास्त्र्यवसाना
षट्पदातिशक्वरी (७१) एकसप्ततितमायाश्च बृहती छन्दांसि ॥

# अथ विंशं काराडम्

## (१) प्रथमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य क्रमेण विश्वामित्रो गोतमो विरूपश्च ऋषयः ।
इन्द्रो मरुतोऽग्निश्च क्रमेण देवताः । गायत्री छन्दः

इन्द्रं त्वा वृषभं वयं सुते सोमे हवामहे ।
स पाहि मध्वो अन्धसः ॥१॥

मरुतो यस्य हि क्षये पाथा दिवो विमहसः ।
स सुगोपातमो जनः ॥२॥

उक्षान्नाय वशान्नाय सोमपृष्ठाय वेधसे ।
स्तोमैर्विधेमाग्नये ॥३॥

## (२) द्वितीयं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य गृत्समदो मेधातिथिर्वा ऋषिः । मरुदादयो देवताः ।
(१-२) प्रथमाद्वितीययोर्ऋचोरेकावसाना विराड्गायत्री (३) तृतीयाया
एकावसानार्च्युष्णिक् (४) चतुर्थ्याश्चैकावसाना साम्नी त्रिष्टुप् छन्दांसि

मरुतः पोत्रात्सुष्टुभः स्वर्कादृतुना सोमं पिबन्तु ॥१॥

अग्निराग्नीध्रात्सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥२॥

इन्द्रो ब्रह्मा ब्राह्मणात्सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥३॥

देवो द्रविणोदाः पोत्रात्सुष्टुभः स्वर्कादृतुना सोमं पिबतु ॥४॥

## (३) तृतीयं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्येरिम्बिठिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
एदं बर्हिः सदो मम ॥१॥

इन्द्रो देवता । त्रिष्टुप् छन्दः

एवा पाहि प्रत्नथा मन्दतु त्वा श्रुधि ब्रह्म वावृधस्वोत गीर्भिः ।
आविः सूर्यं कृणुहि पीपिहीषो जहि शत्रूँरभि गा इन्द्र तृन्धि ॥१॥

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥२॥

आपूर्णो अस्य कलशः स्वाहा सेक्तेव कोशं सिषिचे पिबध्यै ।
समु प्रिया आववृत्रन्मदाय प्रदक्षिणिदभि सोमास इन्द्रम् ॥३॥

## (९) नवमं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य (१-२) प्रथमाद्वितीययोर्ऋचोर्नोधाः (३-४) तृतीयाचतुर्थ्योश्च मेध्यातिथिर्ऋषी । इन्द्रो देवता । (प्रगाथश्छन्दः)

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥१॥

द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥२॥

तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥३॥

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥४॥

## (१०) दशमं सूक्तम्

(१-२) द्व्यृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः

उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥१॥

विमदन्बर्हिरासरन् ॥३॥

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥४॥

द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्रिणं मक्षू गोमन्तमीमहे ॥५॥

तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥६॥

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥७॥

## (५०) पञ्चाशं सूक्तम्

(१-२) द्व्यृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥१॥

कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥२॥

## (५१) एकपञ्चाशं सूक्तम्

(१-४) चतुर्ऋचस्यास्य सूक्तस्य (१-२) प्रथमाद्वितीययोर्ऋचोः प्रस्कण्वः (३-४) तृतीयाचतुर्थ्योश्च पुष्टिगुर्ऋषी । इन्द्रो देवता । प्रगाथश्छन्दः

अभि प्र वः सुराधसमिन्द्रमर्च यथा विदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥

शतानीकेव प्र जिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।

त्वामुग्रमवसे चर्षणीसहं राजन्देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना वसोऽमित्रान्सुषहान्कृधि ॥२॥

## (८१) एकाशीतितमं सूक्तम्

(१-२) द्व्यृचस्यास्य सूक्तस्य पुरुहन्मा ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः

यद्द्याव इन्द्र ते शतं शतं भूमीरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या अनु न जातमष्ट रोदसी ॥१॥

आ पप्राथ महिना कृष्ण्या वृषन्विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन्गोमति व्रजे वज्रिं चित्राभिरूतिभिः ॥२॥

## (८२) द्व्यशीतितमं सूक्तम्

(१-२) द्व्यृचस्यास्य सूक्तस्य वसिष्ठ ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः

यदिन्द्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥१॥

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥२॥

## (८३) त्र्यशीतितमं सूक्तम्

(१-२) द्व्यृचस्यास्य सूक्तस्य शंयुर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।
छर्दिर्यच्छ मघवद्भ्यश्च मह्यं च यावया दिद्युमेभ्यः ॥१॥

ये गव्यता मनसा शत्रुमादभुरभिप्रघ्नन्ति धृष्णुया ।
अध स्मा नो मघवन्निन्द्र गिर्वणस्तनूपा अन्तमो भव ॥२॥

## (८४) चतुरशीतितमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः

## (९५) पञ्चनवतितमं सूक्तम्

(१-४) चतुर्ऋृचस्यास्य सूक्तस्य (१) प्रथमर्चो गृत्समदः
(२-४) द्वितीयादितृचस्य च सुदाः पैजवन ऋषी । इन्द्रो देवता ।
(१) प्रथमाया अष्टिः (२-४) द्वितीयादितृचस्य च शक्वरी छन्दसी

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्सोममपिबद्विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्तवे महामुरुं सैनं सश्चद्देवो देवं सत्यमिन्द्रं सत्य इन्दुः ॥१॥

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत ।
अभीके चिदु लोककृत्संगे समत्सु वृत्रहास्माकं बोधि चोदिता
नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥२॥

त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् ।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे
नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥३॥

वि षु विश्वा अरातयोऽर्यो नशन्त नो धियः ।
अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति या ते रातिर्ददिर्वसु
नभन्तामन्यकेषां ज्याका अधि धन्वसु ॥४॥

## (९६) षरणवतितमं सूक्तम्

(१-२४) चतुर्विंशत्यृचस्यास्य सूक्तस्य (१-१०) प्रथमादिदशर्चां पूरणः (११-१६) एकादश्यादिषरणां रक्षोहाः (१७-२३) सप्तदश्यादिसप्तानां ब्रह्मा (२४) चतुर्विंश्याश्च प्रचेता ऋषयः । (१-५) प्रथमादिपञ्चानामिन्द्रः (६-९) षष्ठ्यादिचतसृणामिन्द्राग्नी आयुर्यक्ष्मनाशनञ्च (१०) दशम्या आयुः (११-१६) एकादश्यादिषरणां गर्भसंस्रावे प्रायश्चित्तम् (१७-२३) सप्तदश्यादिसप्तानां यक्ष्मविबर्हणम् (२४) चतुर्विंश्याश्च दुःस्वप्ननाशनं देवताः । (१-८) प्रथमाद्यष्टानां त्रिष्टुप् (९) नवम्याः शक्वरीगर्भा जगती (१०-१८, २४) दशम्यादिनवानां चतुर्विंश्याश्चानुष्टुप् (१९) एकोनविंश्याः ककुम्मत्यनुष्टुप् (२०) विंश्याश्चतुष्पदा भुरिगुष्णिक (२१) एकविंश्या

आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥३॥

यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥४॥

इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्ताय वज्रः प्रति धायि दर्शतो महो दिवे न सूर्यः ॥५॥

## (१०६) षडुत्तरशततमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य गोषूक्त्यश्वसूक्तिनावृषी । इन्द्रो देवता । उष्णिक् छन्दः

तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥१॥

तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः ।
त्वामापः पर्वतासश्च हिन्विरे ॥२॥

त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
त्वां शर्धो मदत्यनु मारुतम् ॥३॥

## (१०७) सप्तोत्तरशततमं सूक्तम्

(१-१५) पञ्चदशर्चस्यास्य सूक्तस्य (१-३) प्रथमादितृचस्य वत्सः (४-१२) चतुर्थ्यादिनवर्चां बृहद्दिवोऽथर्वा (१३-१४) त्रयोदशीचतुर्दश्योर्ब्रह्मा (१५) पञ्चदश्याश्च कुत्स ऋषयः । (१-३) प्रथमादितृचस्येन्द्रः (४-१२) चतुर्थ्यादिनवानां वरुणः (१३-१५) त्रयोदश्यादितृचस्य च सूर्यो देवताः । (१-३) प्रथमादितृचस्य गायत्री (४-११, १४-१५) चतुर्थ्याद्यष्टानाञ्चतुर्दशीपञ्चदश्योश्च त्रिष्टुप् (१२) द्वादश्या भुरिक्परातिजागता त्रिष्टुप् (१३) त्रयोदश्याश्चार्षी पङ्क्तिश्छन्दांसि

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
समुद्रायेव सिन्धवः ॥१॥

वव्च ऋष्वो अस्तृतः ॥१४॥

## (१३८) अष्टात्रिंशदुत्तरशततमं सूक्तम्

(१-३) तृचस्यास्य सूक्तस्य वत्स ऋषिः । इन्द्रो देवता । गायत्री छन्दः

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव ।
स्तोमैर्वत्सस्य वावृधे ॥१॥

प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ।
विप्रा ऋतस्य वाहसा ॥२॥

कण्वाः इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।
जामि ब्रुवत आयुधम् ॥३॥

## (१३९) एकोनचत्वारिंशदुत्तरशततमं सूक्तम्

(१-५) पञ्चर्चस्यास्य सूक्तस्य शशकर्ण ऋषिः ।
अश्विनौ देवते । (१, ४) प्रथमाचतुर्थ्योर्ऋचोर्बृहती
(२-३) द्वितीयातृतीययोर्गायत्री (५) पञ्चम्याश्च ककुप् छन्दांसि

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥१॥

यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु ।
नृम्णं तद्धत्तमश्विना ॥२॥

ये वां दंसांस्यश्विना विप्रासः परिमामृशुः ।
एवेत्काण्वस्य बोधतम् ॥३॥

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥४॥

